International Journal of Sanskrit Research 2017; 3(3): 22-26

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 22-26
© 2017 IJSR
www.anantaajournal.com
Received: 07-03-2017
Accepted: 08-04-2017

**Avula Priyanka**
IFP, Pondicherry,
Pondicherry, India

# संस्कृतव्याकरणे सूत्र भेदः

**Avula Priyanka**

सारांश

संस्कृतव्याकरणाभिमाणिनः पाणिनेः व्याकरणसूत्राणि पठन्ति। पतञ्जलिमहामुनेः तु योगसूत्राणि विश्वे प्रसिध्दान्येव। आध्यात्मिकजीवने ज्ञानमार्गेण ब्रह्मसूत्राणाम् (व्याससूत्राणाम्) अध्ययनं निष्टया कुर्वन्ति। तथैव भक्तानां कृते नारदभक्तिसूत्राणि सन्ति। अन्येषु विषयेषु चापि सूत्राणि वर्तते। यथा गणियसूत्राणि इत्यादिनि। अस्मिन् लेखने सूत्रम् इत्युक्ते किम् ?इत्यस्य स्वल्प परिचयः क्रियते। सूत्रम् इत्युक्ते एकस्मिन् वाक्ये महतः विषयस्य संक्षिप्तवर्णनम् इति सामान्यज्ञानम् किन्तु तत्रापि गूढार्थाः सन्ति। पद्मपुराणे कुत्रचित् सूत्रस्य अर्थः विवृतः क्ष्लोकरूपेण अतिसुन्दरतया वर्णितम् क्ष्लोकः अस्ति।

**कुट शब्दः** संस्कृतव्याकरणे, सूत्र, योगसूत्राणि

## प्रस्तावना

अल्पाक्षरम् असंन्दिग्दं सारवत् विश्वतोमुखम्।
अस्तोभम् अनवद्यं च सूत्रं सूत्रविदो विदुः ।।

सूत्रविदः नाम सूत्रम् इत्युक्ते किमिति ज्ञानं येषाम् अस्ति ते ते वदन्तियत्।

- सूत्रंम् अल्पाक्षरं भवेत् अत्र अक्षरस्य एव उल्लेखनं कृतम्। इत्युक्ते सूत्रे यावच्छक्यं तावत् केवलं अक्षराणाम् उपयोगः भवतु इति नाम अक्षराणि अर्थ बोधयितुम् अपर्याप्याणि चेदेव पदानाम् उपयोगः इति अल्पपदम् इति न उक्तम् वाक्यम् इति वा नैव उक्तम् अक्षराण्यपि यावन्ति। आवश्यकानि तावन्ति एव – अल्पाक्षरम्।
- सूत्रम् असंन्दिग्धम् अपि स्यात्। संन्दिग्धं नाम वक्रता सूत्रे पठिते वक्रार्यः वा अस्पष्टता वा न भवेदिति असन्दिग्घम्।
- सूत्रं सारवत् विश्वतोमुखम् बृहद्विषयकमपि सारवात् नाम अर्थवत् एव सूत्रम् इति उच्यते अत्यन्तं संक्षिप्तरूपेण अर्थं बोधयेदिति सारवत्।

Correspondence
**Avula Priyanka**
IFP, Pondicherry,
Pondicherry, India

- सूत्रम् अस्तोभं – सस्य स्थाने अन्यस्य कस्यचिदपि स्थापदेन ज्ञानपूर्णत न भवति तत् अस्तोभं।
- सूत्रम् अनवद्यम् – अवद्यं नाम दोषः सूत्रे देषः वा अपराधः वा न भवति – अनवद्यम्।

उपरि विवृतान् नियमान् यत् वाक्यं पालयति तदेव सूत्रम् इति उच्यते तदेव सूत्रविदः सूत्रम् इति जानन्ति।

अष्टाध्याय्यां पाणिनिना षड्विधानि सूत्राणि प्रोक्तानि। तथा हि –

संज्ञा परिभाषा च विधिर्नियम एव च।
अति देशोऽधिकारश्च षड्विधं सूत्रमुच्यते।।

अर्थात् सूत्रं षड्विधम् – संज्ञा – परिभाषा – विधि- नियम – अतिदेश – अधिकारभेदात्।

**संज्ञासूत्रम् –**

संज्ञा च नाम यतो न लघीयः, अथवा शक्तिग्राहकत्वं संज्ञासूत्रत्वम्। संज्ञासूत्राणि यथा – वृध्दिरादैच्,अदेङ्गुणः,हलन्त्यम् इत्यादीनि। संज्ञाशास्त्रं व्याकरणशास्त्रे प्रयुज्यमानानि पारिभाषिकपदानि बोधयति। प्रातिपदिक – सर्वनाम – अव्यय – टि – घु – वृध्दि – गुण – उदात्त – अनुदात्त – स्वरित प्रभृतयः संज्ञाः व्याकरणशास्त्रे कथं विहिताः? तासां तावद् द्विविधा – शब्दसंज्ञा , अर्थसंज्ञा चेति भेदात्। वृध्दि – गुण प्रभृतयः संज्ञाः शब्दसंज्ञाः, विभाषा लोपादयः अर्थसंज्ञाः। तथा च काश्चन अन्वर्थसंज्ञाः,यतो हि प्रधानसिध्दाः सर्वार्थवाचकाः सर्वविश्वप्रभृतयः शब्दा एव प्रातिपदिकानां स्थाने प्रयुक्तत्वात् सर्वनामान्युच्यन्ते। सर्वनामत्वार्थं सर्वादिगणे पाठेन सह प्रधानसिध्दस्वीयसर्वार्थवाचकताऽप्यास्यावश्यकी प्रतीयते। टि – घु – भ प्रभृतयः संज्ञा रूढिसंज्ञाः सन्ति।

अर्थवदधातु, कृत्तध्दितः प्रातिपदिक संज्ञा सूत्रम्। सर्वादीनि सर्वनामानि सर्वनाम संज्ञा सूत्रम्। सर्वादिनिपातमव्ययम् अव्यय संज्ञा सूत्रम्। अयोऽन्त्यादि टि टि संज्ञा सूत्रम्। दाधा ध्वदाप् इति सूत्रेण घु संज्ञा। वृध्दिरादैच् वृध्दि संज्ञा सूत्रम्। अदेङ्गुणः गुण संज्ञा सूत्रम्। उच्चैरूदात्तः उदात्त संज्ञा विधायकम्। नीचैरनुदात्तः अनुदात्त संज्ञा विधायकम्। समाहार स्वरितः स्वरित संज्ञाविधायकम्।

**परिभाषासूत्रम्**

अनियमे नियमकारित्वं परिभाषात्वम्। तदुक्तं भगवता पतञ्जलिना पिरभाषापुनरेकदेशस्था (सति) सर्वं शास्त्रमधिज्वलयति प्रदीपवत्। परितो भाष्यतोऽनया इति व्युत्पत्त्या परिभाषा शब्दोव्युत्पन्नः। श्री नागेशभट्टो व्याकरणमहाभाष्ये उद्योतटीकायां वदति –

एकदेशस्थिता शास्त्रभवेन याति दीपताम्।
परियो व्यापृतां भाषां परिभाषां प्रचक्षते।।

काशिकादिग्रन्थेषु अनियमो नियमकारिणी परिभाषा इति लक्षणमुपलभ्यते। परिभाषेन्दुशेखर ग्रन्थस्य विजया टीकायां श्री पं जयदेवम्श्रेणोक्तम् – विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगि साधुत्वप्रकारकशक्त्याविषयकबोधदनकत्वे सति अधइकारशास्त्रभिन्नत्वं परिभाषात्वम्।

श्री. पं सभापतिशर्मोपाध्यायमहाभागा स्ध्दान्तकैमुद्याः लक्ष्मी टीकायां स्वीकरवंन्ति यत् – परिभाषात्वञ्च सङ्केतग्राहकभिन्नत्वे सति विधिशास्त्रविशिष्टत्वम्। वैशिष्ट्यञ्चनावृत्त्य स्वजन्यप्रमात्मकबोधापकारकत्वस्वप्रवृत्तिनिवृत्त्यन्तरप्रयोजकत्ववि शिष्टपाणिनिप्रयत्नन्यायान्यतरसिध्दत्वान्यतरसम्बन्धेन अननुवृत्त्येति निवेशेनाधिकारव्यावच्छेदः। आद्यसंबन्धेन अष्टाध्यायीस्थपरिभाषाणां संग्रहः। द्वीतीयेन न्यायज्ञापकसिध्दानाम् अनुदात्तं पदमेकवर्जम् इत्यादेश्च संग्रहः। परिभाषा द्विविधा – पाणिनिना अष्टाध्यायां पठिताः परिभाषाः, अन्यैर्वैयाकरणैः कृताश्च। तादृशानि परिभाषासूत्राणि प्रथमश्रेण्यामागच्छन्ति। यथा –आदेः परस्य, इको गुणवृध्दी इत्यादि द्वितीयश्रेण्याम्। परिभाषामाश्रित्य कृता ग्रन्थाः परिभाषापाठादयो ग्रन्थाः समाविशन्ति। येषां पाणिनीयसूत्राणां

यथाकालं यथोद्देशं च सम्पूर्णेऽपि व्याकरणशास्त्रे नियमकारित्वेनोपस्थितिर्भवति, तानि परिभाषासबत्राणीति वैयैकरणा वदन्ति। पाणिनिना अष्टाध्यायां प्रायेण पञ्चाशन्मितानि परिभाषासूत्राणि प्रणीतानि। परिभाषानामिदमेव कार्यं भवति यद् व्याकरणशास्त्रे दृष्टस्यानियमस्य दूरीकरणम्। यथा – तस्मिन्निति निर्दिष्टे पूर्वस्य

तस्मादित्युत्तरस्य प्रभृतीनि परिभाषासूत्राणि।

**विधिसूत्रम्**

लक्ष्यविषयकपर्वसंस्कारविषयकबोघजनकत्वं विधिसूत्रत्वं यथा – इकोयणचि, आद्गुण इत्यादि। विधिसूत्रं मुख्यतया द्विविधं भवति – उत्सर्गविधिः, अपवादविधिश्चेति भेदात्। सामान्यतया कस्यचन कार्यस्य प्रत्ययादेर्वा विधायकत्वमुत्सर्गविधिरूच्यते। यथा – कर्मण्यण् इति उत्सर्गविधिसूत्रम्। तादृशं विधायकसूत्रमपवादविधिरित्युच्यते यद् विशिष्टरूपेण कस्यचन कार्यस्य प्रत्ययस्य वा विधायकं स्यात्। यथा - अतोऽनुपसर्गोकः। सूत्रमिदमनुपसर्गे कर्मण्युपपदे आदन्ताध्दातोः क प्रत्ययः विदधाति। अतः सूत्रमिदं कर्मण्यण् इति सूत्रस्यापवादो मन्यते, यतो हि कर्मण्यण् कर्मण्युपपदे धातुमात्रादण् प्रत्ययं विदधाति। अनेन प्रतीयते यदुत्सर्गविधेः क्षेत्रं विसृतं भवति, अपवादस्य च क्षेत्रं तदपोक्षया विशिष्टं सङ्कुचितं वा भवति। अतः प्रायेण आदेशादिविधायकानि सर्वाण्यपि सूत्राण्युत्सर्गापवादभेदेन द्विविधानि। यथा – इकोयणचि इति सूत्रं यदि उत्सर्ग – आदेशविधायकं सूत्रम् , तर्हि अकः सवर्णे दीर्घः अति अपवादआदेशविधायकं सूत्रं वर्तते।

**नियमसूत्रम्**

सर्वत्र प्राप्तस्य विधेस्तदितराविषयत्वसङ्कोचनं नियमः। यथा - कृत्तद्धित- समासाश्च, रात्सस्य इत्यादि। सामान्यतया विधेरुद्दामप्रवृतौ नियन्त्रणं विधातुं यत् सूत्रं निर्मीयते तदुच्यते नियमसूत्रम् । नियमसूत्रम् विधिसूत्रस्य क्षेत्रं सङ्कुचितं विधाय तत्समुचितमार्गे प्रवर्तयति। अनेन विधेः तदितरविषयत्वमतिप्रसङ्गो वा दूरीभवति। अपवादविधिविषये नियमसूत्रं तस्य किञ्चित् क्षेत्रं स्वायत्तीकृत्य स्वयं विधायकं भवति।

नियमसूत्रस्य नियन्त्रणक्षेत्रं न केवलमुत्सर्गविधिः अपवादविधिर्वा, अपि तु संज्ञा- परिभाषा अधिकारसूत्राण्यपि नियमयति नियमसूत्रम्। यथा धातोस्तन्निमित्तस्यैव इति सूत्रं नियमसूत्रमस्ति। तव्यम् अवश्यलाव्यम् इत्यत्र लो + यम् अवश्यलौ + यम् इति स्थितौ वान्तो यि प्रत्यये इति सूत्रेण वान्तादेशः प्राप्नोति, किन्तु ओयते, औयत इत्यत्रापि वान्तादेशस्य अतिप्रसङ्ग।

अत तं नियमयितु सूत्रं भवति - धातोस्तन्निमित्तस्यैव इति । सूत्रेण अनेन नियमो विहितो यद् यादौ प्रत्यये परतः धातोः ओकारस्य, औकारस्य वा वान्तादेशः स्याच्चेत् तदैव स्याद् यदि यादिप्रत्ययं निमित्तं मत्वा कृत आदेश ओकारः, औकारो वा स्यात्। नियमेनानेन वान्तो यि प्रत्यये इति सूत्रं नियन्त्रितम्। अत एव लो + य इति स्थितौ तस्य ओकारस्य वान्तादेशः औकार यनिमित्तको नास्ति, अपितु आङ्पूर्वात् वेञ् धातोः लटि कर्मवाच्ये यकि आत्मनेपदे त प्रत्यये कृते सम्प्रसारणे पूर्वरूपे कृते आ उ य ते इति स्थितौ आद्गुणः इत्यनेन गुणे कृते ओकारो निष्पद्यते तत्र य निमित्तं नास्ति ।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति इति सूत्रमपि नियमसूत्रम् ।सुब्विधिस्वरसंज्ञाग्विधिषु कृति प्रत्यये च परत तुग्विधौकर्तव्ये नलोपो असिद्धो भवति। पूर्वत्रासिद्धम् इति सूत्रेण नलोपकार्यस्य असिद्धत्वे अतिप्रसङ्गवारणाय नियमसूत्रमिदम् (नलोप सुप्स्वर)नियमयति यत् सुब्विधिप्रभृतिकार्याणां कर्तव्य एव नलोपोऽसिद्धः स्यात नान्यत्रेति । अतएव राजाश्वः इत्यत्र अकः सवर्णे दीर्घः ' इत्यनेन सवर्णदीर्घे कर्तव्ये नलोपोऽसिद्धोन जातः। नियम सूत्रं द्विविधम् - विधेयात्मकं, निषेधात्मकं चेति। उपर्युक्तेषु उदाहरणेषु विधेयात्मकं नियमनं दृश्यते। आकडारादेकासञ्ज्ञा' इति विधेयात्मकं नियमसूत्रम् । कडाराः कर्मधारये इति सूत्रं यावदेकैव संज्ञा स्यादिति कथने विधेयात्मकतैव वर्तते। पदान्तस्य इति निषेधसूत्रम्। इदं पदान्तस्य नस्य णत्वं न

इत्युक्त्वाणत्वनिषेधमुखेन अर्थात् - रषाभ्यां नो णः समानपदे इति सूत्रेण, अड्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण च प्राप्तं णत्वं निषिध्य पदान्तेतरनकारे णत्वविधिं नियमयति ।

**अतिदेशसूत्रम्**

अन्यधर्मस्य अन्यत्राऽरोपणमतिदेशः । यथा स्थानिवदादेशोऽनल्विधौ,' तृज्वत्क्रोष्टुः इत्यादि । अतिदेशसूत्रं विधिसंज्ञाप्रभृति सूत्राणां विषयं, कार्यक्षेत्रं वा विस्तारयति । "गुरुवद् गुरुपुत्रे वर्तितव्यम्" इति दृष्टान्तमाश्रित्य अतिदेशस्य कल्पना वर्तते । वस्तुतस्तु वद् घटितत्वम् अतिदेशत्वम् । यत्र सूत्रे वार्तिके वा "वत्" शब्दः, वदर्थों वा अनुप्रविष्टः तद् "अतिदेश" नाम्नोच्यते । अतिदेशस्तावद् बौद्धिक आरोपः । स द्विविधः शाब्दिकः आर्थिकश्च । स्थानिवदादेशोऽनल्विधौ' इतिसूत्रेण अतस्मिन् यस्तद्बुध्दिरारोप्यते सः "वत्" युक्तेन पदेन विधीयते । अत्रारोपे "वत्" शब्दः श्रुतः, अत एवायं "श्रुतातिदेश" इत्युच्यते। ' असंयोगाल्लिड्कित् इति सूत्रे "वत्" इति पदं नास्ति । अतः अतिदेशोऽयम् आर्थोऽतिदेश इत्युच्यन्ते, यतो हि अपित् लिट् तु किद् न भवितुमर्हति । अतः तस्यार्थः किद्वद् कर्तव्यः स्यात् । "वत्" शब्दमन्तरेणापि "वत्" इत्यर्थस्य प्रतीतेः तादृशोऽतिदेशः आर्थातिदेश" उच्यते ।नियमसूत्रं प्रतिषेधसूत्रं तु विधिविषयं क्षेत्रं वा सङ्कोचयतः किन्त्यतिदेशसूत्रं विधि विषयं विस्तारयति । अतिदेशाः ते त्रिविधाः संज्ञातिदेश - स्थान्यतिदेश युक्तातिदेश भेदात्। । संज्ञातिदेशो यथा - सार्वधातुकमपित् इति सूत्रेण ङिद्वत् अतिदेशः इत्यादि । स्थान्यतिदेशो यथा - स्थानिवदादेशोऽनल्विधौ इति सूत्रेण स्थानिवदादेशः । युक्तातिदेशो यथा - लुपि युक्तवद् व्यक्तिवचने इति सूत्रम्। । कार्यदृष्ट्या अतिदेशः, शास्त्रातिदेशः, कायातिदेशः, रूपातिदेशश्च इति भेदात् त्रिविधः । शास्त्रातिदेशे शास्त्राणामतिदेशो भवति, सूत्राण्येव कार्याणि कुर्वन्ति । किन्तु कायातिदेशे अतिदेश एव अपेक्षितं कार्यं विदधाति । अतिदेशः कार्यातिदेशपक्षीयाणां मतानुसारेण विधिमतिक्रम्य वर्तते । प्रत्ययलोपे प्रत्ययलक्षणम् इति कार्यातिदेशस्योदाहरणम्। अतएव तस्य क्ष्यस्यायमर्थः कृतो यत् - प्रत्यये लुप्तेऽपितदाश्रितं कार्यं स्याद् इति । स्थानिवदादेशोऽनल्विधौ ' इति शास्त्रातिदेशस्योदाहरणम् । अतएव श्रीभट्टोजिदीक्षितमहोदयेन सिद्धान्तकौमुद्यामुक्तं यद् रामाय इत्यत्र अनेन सूत्रेण स्थानिवद्भावात् यादेशे सुप्त्वं स्वीकृतम् तथा च सुपि च इत्यनेन दीर्घो जातः । द्विर्वचनेऽपि' इति सूत्रं पतञ्जलिजयादित्यवामनादयो वैयाकरणा रूपातिदेशत्वेन स्वीकुर्वन्ति । यथा – "चक्रतुः" इत्यत्र कृ + अतुस् इति स्थितौ यणि कृते क्र + अतुस् इति स्थितौ धातौ अचोऽभावात् द्वित्वाभावो भवति । तस्यां स्थितौ द्विर्वचनेऽपि इतिसूत्रेण रूपातिदेशे कृते कृ आगच्छति, द्वित्वं च जायते । अत एव अभ्यासे अचः श्रवणं जायते ।

**अधिकारसूत्रम्**

अधिकारसूत्रस्य लक्षणं भवति - उत्तरोत्तरगमनमधिकारः । यत् सूत्रं निश्चितावधिपर्यन्तमुत्तरसूत्रेषु गच्छति तद् अधिकारसूत्र नाम उच्यते। अधिकारः सम्पूर्णसूत्रस्य, सूत्रांशपदस्य, पदैकदेशस्य वा भवति ।

वस्तुतस्तुस्वस्थले लक्ष्यसंस्कारविषयकबोधाजनकत्वे सति उत्तरसूत्रानुवृत्त्या लक्ष्य- संस्कारविषयकबोधजनकत्वम् अधिकारसूत्रत्वमू। यथा - अङ्गस्य, भस्य इत्यादि । अधिकारसूत्राणां व्यापकतामङ्गीकृत्य भाष्यकृतापतञ्जलिना अधिकारसूत्राणां त्रिधा विभक्तानि'-

1. कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति । यथाप्रदीपः सुप्रज्वलितः सर्वं वेश्माभि- ज्वलयति ।
2. अपरोऽधिकारो यथा रज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते ।
3. अपरोऽधिकारः प्रतियोगं तस्य अनिर्देशार्थ इति योगे योगे उपतिष्ठते ।

धातोः , अङ्गस्य इत्यनयोः अधिकारसूत्रयोः समूर्णस्य अधिकारः उत्तरसूत्रेषु गच्छति। धातोः इत्यस्य अधिकारः तृतीयाध्यायपर्यनाम् अङ्गस्यइत्यधिकारः सप्तमाध्याय

पर्यन्तमस्ति। इको यणचि इति सूत्रस्य "अचि" इति पदमग्रेऽनुवर्तते। एतानि सूत्राणि पदाधिकारस्य उदाहरणत्वेन स्वीकर्तुं शक्यन्ते। पदैकदेशस्य अनुवृत्तेरुदाहरणमस्ति संख्याव्ययादेर्ङीम् इति। अस्मात् दामहायनान्ताच्च इति सूत्रे संख्यादिग्रहणमनुवर्तते। झोऽन्तः ' इति सूत्रे आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इति सूत्रात् प्रत्यय- ग्रहणमनुवर्तते ।

## निष्कर्ष

अत्र इदमेव कारणं यत् पाणिनिना अष्टाध्यायं स्वरितेनाधिकारः इति सूत्रे अधिकारस्य कृते स्वरितत्त्वप्रतिज्ञा विहिता । इदमस्ति परिभाषासूत्रम्। स्वरितत्त्वप्रतिज्ञया न केवलमनुवृत्तिर्भवति, किन्त्वपकर्षोऽपि जायते। अतः उत्तरोत्तरगमनमधिकारः इति लक्षणं प्रायिकमेव मन्तव्यम्। एवंप्रकारेण भगवता पाणिनिना अष्टाध्याय्यां षड्विध सूत्रमुखेन लघुनाउपायेन शब्दोपदेशो विहितः।

## उपयुक्तग्रन्थसूची


1. अष्टाध्यायी – पाणिनिः, श्रीशान्तिस्वरूप कपूर, श्री रामलाल कपूर ट्रस्ट प्रेस, बहालगढ, हरियाणा.
2. महाभाष्यम् – पतञ्जलिः,चौखम्बा विद्याभवन्,वारणासी.
3. मनुसमृति – मनुः,मोतिलाल बनारसीदास, दिल्ली.
4. वैयाकरणसिध्दान्तकौमुदी – भट्टोजीदीक्षितः, चौखम्बा भारतीय प्रकाशन्, वारणासी.
5. सिध्दान्तकौमुदी – भट्टोजीदीक्षितः, निर्णयसागर मुद्रणालयः, मुम्बई.
6. अमरकोशः – अमरसिंह, चौखम्बा विद्याभवन् , वारणासि.